नं० १०८८-घ

रुद्रयामल तंत्र भवानी सहस्रनाम
स्तवम्

पत्राणि ३८

रुद्रयामले तंत्रे भवानीनामसह
स्रस्तवराजः

नं० १० ४४-घ

पत्राणि ३८

३८ पत्र

ॐ श्रीगणेशाय नमः ॥ ॐ नमो भगवत्यै ॥
ॐ ध्यं त्वं त्रिशूलशरचापकरां त्रिनेत्रां ॥ तिग्मेत
रांशुकलया विलसत्किरीटां ॥ सिंहस्थितामसु
रसिद्धनतां च दुर्गां ॥ दूर्वानिभां दुरितदुःखह
रीं नमामि ॥ ॐ नमो भवान्यै ॥ ॐ अक्षकुलकलय
न्तीं चक्रमध्ये स्फुरन्तीं ॥ मधुरमधु पिबन्तीं कं

भ॰
स॰
२

ठकान्मत्तयंती॥ दुरितमुपहरंतीसाधकान्मो
षयंती॥ जयतिजगतिदेवीश्रीहेदरीक्रीडयं
ती॥ चन्द्रभुंजामेकवक्रेश्चर्णेंडवदनप्रभो॥१
खड्गशक्तिधरादेवीवरदाभयपाणिका॥ प्रन
मस्यामहारौद्रीभुजंगेनोपवीतिनी॥ भवा
नीकालसंहारबडमुडाविभूषिता॥ जगत्रि

तिकंरीब्रह्मविष्णुरुद्रादिभिः स्तुतैः ॥ स्तुतो ।
नोपरमेशानीं नौम्यहं विघ्नहारिणी ॥ कैला
सशिखरे रम्ये देवदेवमहेश्वरम् ॥ ध्यानोत्तर
नमासीनं प्रसन्नवसुलपंकजे ॥ हराहरशिरो
रत्नैरंजितांघ्रिपुरंप्रभे ॥ प्रणम्य शिरसा नंदी
बद्धांजलिरभाषत ॥ श्री नंदिकेश्वर उवाच ।

म. स. २.

देवदेव जगन्नाथ सर्वेशोसि महान्मम ॥ रहस्य
मेकमिच्छामि प्रष्टुं त्वां भक्तवत्सल ॥ देवताया
स्त्वयाकस्याः स्तोत्रमेतद्दिवानिशं ॥ पठ्यतेत्व
रतेनाथ त्वत्तः किमपरः परः ॥ इति पृष्टस्तदा
देवोनेदिकेन जगद्गुरुः ॥ प्रोवाच भगवानेको
विकसन्नेत्रपंकजः ॥ श्रीभगवानुवाच ॥ साधु

२

साधुगणेश्वरएवानमिमोचयत ॥ स्कंदस्या
पिचयज्ञोग्रेरहस्येकण्ठयामितत ॥ उराकल्प
त्येलोकासिहत्वर्शुठचेतनः ॥ गुणत्रयम
योशक्तिर्मूलप्रकृतिसंज्ञिता ॥ तस्यामहंसमु
त्पन्नस्तत्वैस्तैर्महदादिभिः ॥ चेतनेतिततः शा
क्तिर्मेकाप्यालिंगातस्तुषी ॥ हेतुःसेकलजा

भ. स. ३

लस्मामनोधिष्ठायिनीशुभा ॥ इच्छेतिपरमाशा
क्तिरुन्मीलनतत्परा ॥ ततोवागितिविख्या
ता शक्तिः शब्दमयीपरा ॥ प्रादुरासीज्जगन्माता
वेदमातासरस्वती ॥ ब्राह्मीचवैष्णवीरौद्रीकौ
मारीपार्वतीशिवा ॥ सिद्धिदाबुद्धिदाशान्तास
र्वमंगलदायिनी ॥ तयैतत्सृज्यतेविश्वमनाधा

ंच धार्यते ॥ न चैनत्वात्त्वने सर्वं तस्मान्मामेव व्य
लीयते ॥ अचिंतप्रणतार्ध्यानात्सर्वभावविवि
निश्चितैः ॥ आराधितास्तु तामेव सर्वसिद्धिप्र
दायिनी ॥ तस्माच्च तुग्रहादेवतामेव स्तुनवा
नहे ॥ सहस्रैर्नामभिर्दिव्यैस्तैर्लोकप्राणिह
जितैः ॥ स्तवेनानेन संतुष्टा मामेव प्रविवेशसा

तदारभ्यमयाप्राप्तमैश्वर्यंपदमुत्तमं॥तन्म
भावान्मयासृष्टंजगदेतच्चराचरं॥सदेवासु
रगंधर्वयक्षराक्षसमानवं॥सपन्नगंससा
मुद्रंसशैलवनकाननं॥सराशिग्रहनक्षत्रं
पंचभूतगुणान्वितं॥नेदिवामसहस्रेणस्त
वेनानेनसर्वदा॥लोमिपरापरांशक्तिमभा

नुग्रहकारिणी ॥ इत्युक्तौ पवनेंदेवं वगोचर
गुरुं विभुं ॥ प्रणम्य शिरसा नंदी प्रोवाच परमे
श्वरं ॥ श्रीनंदिकेश्वर उवाच ॥ भगवन्देवदेवे।
श लोकनाथ जगत्पते ॥ भक्तोस्मि तव दासो।
स्मि प्रसादः क्रियतां मम ॥ इच्छामि स्तवमिमं श्रोतुं
दुर्लभं यत्सुरैरपि ॥ श्रोतुमिच्छाम्यहं देव प्रभा

वमपि चास्य तु ॥ श्री भगवानुवाच ॥ शृणु दे
वि महाभागे स्तवराजमिमं शुभं ॥ सहस्रैर्ना
मभिर्दिव्यैः सिद्धिदं सुखमोक्षदं ॥ शुचिभिः
प्रातरुत्थाय पठितव्यं समाहितैः ॥ त्रिकाल
श्रद्धया युक्तैर्नीतः परतरः स्तवः ॥ २५ ॥ ओं अ
स्य श्रीभवानीनामसहस्रस्तवराजस्य ॥ सदाशि

वृक्षऋषिः स्मृतः॥ देवता जगतां धात्री त्रिकूटाय ।
र्मोनमः॥ शक्तिश्चंडी कीलकं चक्रमगराजाभि
धेवटेन॥ क्लें दो नुहृप्समाख्यातो मनसोवा ।
क्लिनप्रदः॥ चू॥ ॐ ह्रीं चंडि योगेश्वरी सर्वभवा
नी सर्वकामफलप्रदे॥ सर्वसौभाग्यदायिनी ह्रीं
नमः॥ इति भवानी नाम सहस्रस्य मूलमंत्रः॥ ।

भः सः ५

ॐ ह्रीं श्रीगुणाभ्यां नमः ॥ ॐ ह्रीं वेद्वियोगेश्वरीजने
नीभ्यां नमः ॥ ॐ ह्रीं भवभवानीमध्यमाभ्यां नमः ।
ॐ ह्रीं सर्वकामफलप्रदेश्वनामिकाभ्यां नमः ॥ ॐ
ह्रीं सर्वसौभाग्यदायिनीकनिष्ठिकाभ्यां नमः ॥ ॐ
ह्रीं नमः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्या
सः ॥ अथ हृदादि षडंगन्यासः ॥ ॐ ह्रीं हृदयाय

नमः॥ ॐ ह्रीं भवभवं द्रि योगेश्वरी शिरसे स्वा
हा॥ ॐ ह्रीं भवभवानी शिखायै वषट्॥ ॐ ह्रीं स
र्वकामफलप्रदे कवचाय हुं॥ ॐ ह्रीं सर्वसौभा
ग्यदायिनी नेत्रत्रयाय वौषट्॥ ॐ ह्रीं नमः अस्त्रा
य फट्॥ अथ भवानीनामसहस्रन्यासः॥ ॐ ह्रां
ह्रीं ह्रौं अंगुष्ठाभ्यां नमः॥ ॐ ह्रीं ह्रीं क्लीं तर्जनी

भ·
म·
१

भ्यांनमः॥ ॐ श्रूं ह्रूं क्लूं मध्यमाभ्यांनमः॥ ॐ श्रैं (
ह्रैं क्लैं अनामिकाभ्यांनमः॥ ॐ श्रौं ह्रौं क्लौं कनि
ष्ठिकाभ्यांनमः॥ ॐ श्रः ह्रः क्लः करतलकरपृ
ष्ठाभ्यांनमः॥ इति करन्यासः॥ अथ करन्यासः॥
ॐ श्रां ह्रां क्लां हृदयायनमः॥ ॐ श्रीं ह्रीं क्लीं शिर
से स्वाहा॥ ॐ श्रूं ह्रूं क्लूं शिखायै वषट्॥ ॐ श्रैं ह्रैं

ह्रौं कवचाय हुं ॥ ॐ ह्रं ह्रूं ह्रौं नेत्रत्रयाय वौषट् ॥
ॐ ह्रः ह्रूः ह्रौः अस्त्राय फट् ॥ अथ ध्यानं ॥ ॐ बाला
र्कमंडलाभासं चतुर्बाहुं त्रिलोचनं ॥ पाशांकु
शाधरं चापं धारयंतं शिवं भजेत् ॥ ॐ अद्येहमो
ल्लिममलाममरात्रिंवंच्यामंभोजपाशहस्तिश्र
ीकपालहस्ता ॥ रक्तोंगगागारशानोंभवणोषि

नेत्रोधाये च्छिवमवनितोमद विह्वलांगीम् ॥१
श्री ईश्वर उवाच ॥ ॐ महाविद्या जगन्माता महा
लक्ष्मी शिवप्रिया ॥ विष्णुमाया शुभा शांता सिद्धा
सिद्ध सरस्वती ॥ क्षमा कांतिः प्रभा ज्योत्स्ना पार्वती
सर्वमंगला ॥ हिंगुला चंडिका दांता पद्मा लक्ष्मी ह
रिप्रिया ॥ त्रिपुरा नंदिनी नंदा सुनंदा सुरवंदिता

यज्ञविद्यामहामायावेदमातास्वधाधृतिः॥ प्रीतिः
प्रज्ञाप्रसिद्धाचमृडानीविन्ध्यवासिनी॥ सिद्धवि
द्यामहाशक्तिःपृथ्वीनारदसेविता॥ पुरुहूतप्रि
याकान्ताकामिनीपद्मलोचना॥ प्रह्लादिनीम
हामातादुर्गादुर्गतिनाशिनी॥ ज्वालामुखीसु
गोत्राचज्योतिःॐमदहासिनी॥ दुर्गमादुर्लभा

भ·
स·

विद्यास्वर्गतिःपुरवासिनी॥ त्रपर्णापांबरीमाया
मदिरामृडहासिनी॥ कुलवागीश्वरीनित्यानिम
क्लिन्नाकृशोदरी॥ कामेश्वरीचनीलाचभीरुं
डावह्निवासिनी॥ लंबोदरीमहाकालीविद्यावि
द्येश्वरीतथा॥ नेरीश्वरीचसत्याचसर्वसौभाग्य
दायिनी॥ सांकर्षिणीनारसिंहीवैसलवीचमहे

देवी ॥ कात्यायनी च चंपा च सर्व्वसंपत्तिकारि
णी ॥ नारायणी महानिद्रा योगनिद्रा प्रभाव
ती ॥ प्रज्ञापारमित: प्रज्ञा नारा मधुमती मधु:
त्री नाली च सुधाहारा कालिका सिंहवाहनी ॥
गै कारा च सुधाकारा चेतना कोपनाकृति: ॥
अर्धविंदुधरा धारा विश्वमाता कलावती ॥ प

भ॰
स॰
१०

ध्यावतीसुवक्त्राचब्रह्मवक्त्राचसरस्वती॥ कंडास
नाजगधात्रीबुधमाताजिनेश्वरी॥ जिनमाता
जिनेन्द्राचशारदाहंसवाहना॥ राज्यलक्ष्मी
र्वषट्कारासुधाकारासुधात्मिका॥ राजनीतिस्
त्रयीवार्त्तादंडनीतिः क्रियावती॥ सद्भूतिस्तारिणी
श्रद्धासद्भूतिः सत्यपरायणा॥ सिंधुर्मंदाकिनीगं

गायमुनाचसरस्वती॥ गोदावरीविपाशाचका

वेरीचस्नानहृदा॥ सरश्चंद्रभागाचकौशिकी

गंडकीशुचिः॥ नर्मदाकर्मनासाचचर्मएवत्य

प्टेदेविका॥ वेत्रवतीवितस्ताचवरदावरवाह

ना॥ सतीपतिव्रतासाधीरुवक्त्रःकुंडवासि

नी॥ एकवक्त्रःसहस्रातीरुश्रीतिर्भगमालिनी

भ॰ स॰
११

सेनाश्रेणिः पताका च सन्नद्धा युद्धकांक्षिणी ।। पताकिनी टयारंभा विपंचीपंचमप्रिया ।। पराप रकलाकान्ता त्रिशक्तिर्मोक्षदायिनी ।। ऐंद्री माहे श्वरी ब्राह्मी कौमारी कुलवासिनी ।। इच्छा भगव ती शक्तिः कामधेनुः कृपावती ।। वज्रायधा वज्र हस्ता चंडी चंडपराक्रमा ।। गौरी सुवर्णवर्णा च ।

स्थितिसंहारकारिणी॥ एकानेकामहेस्वाव
प्रानवाकूर्ममहाभुजा॥ भुजंगभूषणाभूषा षट्
चक्रक्रमवासिनी॥ षट्चक्रभेदिनी श्यामाका
यस्थाकायवर्जिता॥ सुस्मिता हसमुखी क्षामामू
लप्रकृतिनीश्वरी॥ अजा च बहुवर्णा च पुरुषा
र्थप्रवर्त्तिनी॥ रक्तानीला सिता श्यामा कृष्णा पी

भ॰
स॰
१२

नाचक्रकर्तृरा॥ त्वधात्रस्माजवाह्वधानकर्णीकर
णालया॥ कलाकाष्ठामुहूर्ताचनिमेषाकालरू
पिणी॥ सुवर्णारसनानासाचक्षुस्पर्शवतीरसा
गंधप्रियासुगंधाचसुस्पर्शाचमनोगतिः॥ मृग
नाभिर्मृगाक्षीचकर्पूरामोदधारिणी॥ पद्मयोनिः
सुकेशीचसुलिंगाभगरूपिणी॥ योनिमुद्राम (

हासुद्गाविचरीविगगामिनी ॥ मधुश्रीमाधवीव
ल्ली मधुमत्ता मदोद्धता ॥ मातंगी शुकहस्ता च पु
ष्पबाणैक्षुचापिनी ॥ रक्तांबरधरा देवी रक्त
पुष्पावतंसिनी ॥ शुभ्रांबरधरा धीरा महाश्वेता
वसुप्रिया ॥ सुवेणिः पद्महस्ता च मुक्ताहारविभू
षणा ॥ कर्पूरामोदनिःश्वासा पद्मिनी पद्ममंदि

भ॰
स॰
१३

गा ॥ वह्निनी चक्रहस्ता च अंकुशदीपरिवायुधा ।
वायिणी पाशहस्ता च त्रिशूलवरधारिणी ॥ ह
वाणशक्तिहस्ता च मयूरवरवाहना ॥ वराहुध
धमा वीरा वीरपानमदोत्कटा ॥ वज्रधा वज्रधारा
वे जयाणणकेबरी शिवा ॥ विजया च जयंती च म्ह
तिनी शत्रुनाशिनी ॥ अनंतवंती वेदशक्तिवैरधाव

रधारिणी ॥ शीतला च सुशीला च बालग्रह-
विनाशिनी ॥ कुमारी च सुपर्वा च कामाख्या काम-
वंदिता ॥ जालंधरस्थरानेता कामरूपनिवासि-
नी ॥ कामबीजवती सत्या सत्यधर्मपरायणा ॥ कु-
लमार्गस्थिता सूक्ष्मा स्थूला सद्बुद्धिप्रबोधिनी ॥ षट्को-
णा च त्रिकोणा च त्रिनेत्रा त्रिपुरसुंदरी ॥ वृषप्रिया

भ·
स·
२८

घूणाट्टहासमहिमामहाघातिनी ॥ सेभदर्पहराट्टीमा
दीप्तपावकसन्निभा ॥ कपालभूषणा काली क
पालमालाधारिणी ॥ कपालकुण्डलादीप्ती शिवदू
तीघनध्वनिः ॥ छिन्दिता छिन्दिता नित्या सत्यमार्गप्र
बोधिनी ॥ कंबुग्रीवावरमती छत्रच्छायाकृताल
या ॥ जगत्कुम्भोकुंडलिनी भुजंगाकारशायिनी ॥ प्रो

लसत्समपद्माच नाभिनालमृणालिनी॥ मूला
धारानिराकारावह्निकुंडकृतालया॥ वायुकुं
डसुखासीनानिराधारानिराश्रया॥ श्वासोच्छ्वा
सगतिर्जीवाग्राहिणी वह्निसंश्रया॥ वल्लीतंतुस
मुत्थानाषड्रसास्वादलोलुपा॥ तपस्विनीतपः
सिद्धिस्तपसःसिद्धिदायिनी॥ तपोनिष्ठातपोयु

भ·
म·
१५

कान्तापसीवतनपप्रिया ॥ समधातुमयीमूर्त्तिस
प्तधातेनराश्रया ॥ देहपुष्टिर्मनःपुष्टिरन्नपु
ष्टिर्बलोद्धता ॥ औषधिर्वैद्यमाताच द्रव्यश
क्तिःप्रभावती ॥ वैद्यावैद्यचिकित्साचसुपथ्या
रोगनाशिनी ॥ मृगयामृगमांसादामृगत्वङ्
मृगलोचना ॥ वागुराबंधरूपाचवधरूपावधो

ष्टुता ॥ वंदीवंदिस्तुताकाराकारावंधविमोचि
नी ॥ शृंखलावलहाविद्याहटवंधविमोक्ति
णी ॥ अंबिकावालिकाचांबास्वस्तासाधुजना
र्चिता ॥ कौलिकीकौलविद्याचसुकुलाकुल
पूजिता ॥ कालचक्रभ्रमाभ्रांताविभ्रमाभ्रमना
शिनी ॥ वातालीमेगमालाचसुवृष्टिःसस्यवर्धि

भ·
स·
१८

नी अकाराच इकाराच उकारैकार रूपिणी ॥
ह्रींकारीबीजरूपाच क्लींकारांवरवासिनी ॥ स
र्वाक्षरमयीशक्तिरक्षरावर्णमालिनी ॥ सिंदूरा
रुणवर्णाच सिंदूरतिलकप्रिया ॥ वश्यपाच वश्य
बीजायलोकवश्यविभाविनी ॥ नृपवश्यानृपैः
सेव्यानृपवश्यकरीप्रिया ॥ महिषीनृपमान्या

वन्दमान्यान्वपनैर्दिनी॥ न्वपधर्ममयीधन्याध
नधान्यविवर्धिनी॥ चतुर्वर्णमयीमूर्त्तिश्चतुर्व
र्णैश्चसपूजिता॥ सर्वधर्ममयीसिद्धिश्चतुराश्रम
वासिनी॥ ब्राह्मणीक्षत्रियावैश्याशूद्राचवरव
र्णजा॥ वेदमार्गरतायज्ञवेदिर्विश्वविभाविनी॥
अस्त्रशस्त्रमयीविद्यावरशस्त्रास्त्रधारिणी॥ सुमे

धामत्वमेवाचभद्रकाले पराजिता ॥ गायत्रीम
त्कृतिसंध्यासावित्रीत्रिपदाब्रह्मदा ॥ त्रिसंध्यात्रिप
दीधात्रीह्रपर्वासामगायिनी ॥ पंचालीबालिका
बालाबालक्रीडासनातनी ॥ गर्भाधारधराशून्या
गर्भाशयनिवासिनी ॥ सुरारिघातिनीकृत्यापूत
नाचतिलोत्तमा ॥ लज्जारसवतीनंद्याभवानीपा

पनाशिनी ॥ षड्दोवरं यरागीतिः स्वगीतिर्ज्ञानलो
चना ॥ सप्तस्वरमयी नेत्री षड्जमध्यमदैवता ॥ सू
क्ष्मनाद्यामसंस्थाना स्वस्थास्वस्थानवासिनी ॥ श्म
हाहृहासिनी प्रीता प्रेतासननिवासिनी ॥ गीतनृ
त्यप्रिया कामा तुष्टिदा पुष्टिदा लया ॥ निशमत्यप्रि
याप्रज्ञालोकेशा च स्वरोत्तमा ॥ सविभ्राज्वालिनी

भ॰
स॰
१८

ज्वालाविषमोहार्त्तिनाशिनी॥ विषारित्रागदम
नीक्रूरकुलाभूतेड्वा॥ भूतभीतिहरीरक्षाभू
तावेशविभाविनी॥ रक्षोघ्नीराक्षसीरात्रिदीर्घ
निद्रादिवागतिः॥ चंद्रिकाचंद्रकांतिश्चसूर्य
कांतिर्निशाचरी॥ डाकिनीशाकिनीशिष्याहा
किनीचक्रवाकिनी॥ सितासितप्रियास्वंगास

कलावनदेवता ॥ गुरुरूपधरा गुर्वी सूक्ष्ममी
री विशारदा ॥ महामारी विनिद्रा च तंद्रा सूक्ष्म
विनाशिनी ॥ चंद्रमंडलसंकाशा चंद्रमंडल
वर्तिनी ॥ अणिमादिगुणोपेता सुस्पृहा काम
रूपिणी ॥ अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघा
तिनी ॥ अनादिनिधना पुष्टिश्चतुर्बाहुश्चतुर्मु

भ· स· २९

ष्वी॥ चतुःसमुद्रशयना चतुर्वर्गफलप्रदा॥ का
शपुष्पवतीकाशा रक्तमुद्गलोचना॥ भूताभ
व्या भवविख्याता शैलजा शैलवासिनी॥ वाममा
र्गरता वामा शिववामांगवासिनी॥ वामाचार
प्रिया तुष्टिर्लोपामुद्राप्रबोधिनी॥ भूतात्मा पर
मात्मा च भूतभावविभाविनी॥ मंगला च सुशी

लाचपरमार्थप्रबोधिका॥ दक्षिणादक्षिणामू
र्त्तिःहृदक्षिणाहरिप्रिया॥ योगिनीयोगयुक्ता
चयोगांगाध्यानशालिनी॥ योगपट्टधरामुक्ता
मुक्तानांपरमागतिः॥ नारसिंहीसुजन्माचत्रि
वर्गफलदायिनी॥ धर्मदाधनदाचैवकामदा
मोक्षदाद्युतिः॥ साक्षिणीदक्षणीदाक्षादक्षजा

भ॰ स॰ १०

कोटिरूपिणी ॥ क्रान्तः कात्यायनी स्वच्छा स्वच्छन्दा
च कविप्रिया ॥ सत्यागमा बहिःस्था च काव्यश
क्तिः कवित्वदा ॥ मेनापुत्री सती माता मेनाकभ
गिनी तडित् ॥ सौदामिनी स्वधामा च स्वधामाधा
म शालिनी ॥ सौभाग्यदायिनी द्यौश्च सुभगा द्यु
तिवर्धिनी ॥ श्रीः कृत्तिवसना चैव ककंकाली

कलिनाशिनी ॥ रक्तबीजवधोद्दृप्ता मतंगबीज
मेनतिः ॥ जगज्जीवा जगद्बीजा जगत्त्रयहितै
षिणी ॥ चामीकररुचिश्चांद्री सातयाषोडशी
कला ॥ यत्तत्पदानुबंधा च यक्षिणी धनदार्चि
ता ॥ चित्रिणी चित्रमाया च विचित्रा भुवनेश्वरी
चामुंडा मुंडहस्ता च चंडमुंडवधोद्धुरा ॥ अष्टमी

भ·
स·
२१

काटमी पूर्ण नवमी च चतुर्दशी ॥ अमा कलशा
हस्ता च पूर्णकं भुधरोधरा ॥ श्री रु भैरवी भीमा (
भीमा त्रिपुरभैरवी ॥ महारुंडा च रौद्री च महाभै
रवपूजिता ॥ निर्मुंडा हस्तिनी चंडा करालदश
नानना ॥ कराला विकराला च घोरा घुर्घुरनाशि
नी ॥ रक्तदंतोर्द्धकेशी च बंधूककुसुमारुणा

कादंबरीपटासा च काश्मीरकुंकुमप्रिया ॥ ज्यो
तिर्बीजस्ववर्णा च रतिबीजस्ववर्णदा ॥ मातंगिनी
वरारोहा मत्तमातंगगामिनी ॥ हंसा हंसगतिर्हं
सी हंसोज्ज्वलशिरोरुहा ॥ पूर्णचंद्रमुखी श्यामा
स्मिता श्यामकुंडला ॥ मषी च लेखावली लेखा सु
लेखा लेखकप्रिया ॥ शंखिनी शंखहस्ता च जल

भ॰
स॰
११

स्याजलदेवता ॥ कृतस्नेहावनिः काम्पीमधुगा-
कोच्चवेतिका ॥ च्यचोध्याहारिकामायातीर्थीत्री
र्थेकविश्रिया ॥ विशङ्करागमेयाचकोशास्याको
शिग्रामिनी ॥ कोशिकोतक्रुशगवतीकोशांभीको
शावर्धिनी ॥ कोशदापम्यकोशगाकीकसंभूःकुश
मप्रिया ॥ तोतलाचतलाकोटिःकृटस्थाकोटरा

प्रयाः ॥ स्वंभूश्च सहरूपा च स्वरूपा रूपवर्धिनी ॥
तेजस्विनी सुभिक्षा च बलदा बलदायिनी ॥ महा
कोषी महावर्गा बुद्धिः सदसदात्मिका ॥ महाग्र
हहरा सौम्या विशोका शोकनाशिनी ॥ सात्विकी
सत्वसंस्था च राजसी च रजोवृता ॥ तामसी च त
मोयुक्ता गुणत्रयविभाविनी ॥ अव्यक्ता व्यक्तरूपा

भ॰
स॰
२३

चवेदविद्यांचशांभवी॥ शंकराकल्पिनीकल्पाम
नःसंकल्पसंततिः॥ सर्वलोकमयीशक्तिःसर्व
श्रवणगोचरा॥ सर्वज्ञानवतीवांछासर्वतत्वा
वबोधका॥ जागृतीचसुषुप्तिश्चस्वप्नावस्थातु
रीयका॥ त्वरामंदगतिर्मंदामदिरामोदमोदिनी
पानभूमिःपानपात्रापानदानकरोद्यता॥ घचू

णीरूपणे नेत्रा च किंचिद्व्यक्तभाषिणी ॥ आशा
पूर्णा च दक्षा च दीक्षा दीक्षितपूजिता ॥ नागव
ल्ली नागकन्या भोगिनी भोगवल्लभा ॥ सर्वशा
स्त्रवती विद्या सुस्मृतिर्धर्मवादिनी ॥ श्रुतिः स्मृ
तिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥ मीमांसा त
र्कविद्या च सुभक्तिर्भक्तिवत्सला ॥ सुनाभिर्या

भ०
स०
२४

तत्त्वाज्ञातिर्गभीराभाववर्जिता॥ नागपाशधरा
मूर्त्तिरगाधानागकुंडला॥ सुचक्रचक्रमध्य
स्थाचक्रकोणनिवासिनी॥ सर्वमंत्रमयीविद्या
सर्वमंत्राक्षरावलिः॥ मधुस्रवास्रवंतीवभ्रा
मरीभ्रमरालका॥ मातृमंडलमध्यस्थामातृ
मंडलवासिनी॥ कुमारजननीक्रूरासुमुखी(

ज्वरनाशिनी ॥ भूतानाविद्यमानाचभाविनीश्री
तिमंजरी ॥ सर्वसौख्यवतीमुक्तिराह्लारणविग्ण
मिनी ॥ निधानंपंचभूतानांभवसागरतारिणी
शक्राचग्रहवतीविग्रहाग्रहवर्जिता ॥ रोहि
णीभूमिगर्भाचकालभूःकालवर्त्तिनी ॥ कलंक
रहितानारीचतुःषष्टिभिधावती ॥ जीर्णाचजी

भ॰
स॰
२४

णीवह्नाचन्द्रनानववल्लभा ।। अरज्ञास्तुरतिःश्री
तिरतिरागविवर्धिनी ।। पंचबाणगतिर्भिन्त्रापंच
श्लेष्माशयापरा ।। पंचपित्तवतीशक्तिः पंचस्था
नविबोधिनी ।। कफनुवतीकामवतीवह्निःप्रसव
णीअप्रहा ।। रजःशुक्रधराशक्तिर्जरायुर्गर्भधारि
णी ।। त्रिकालेज्ञात्रिलिंगाचत्रिमूर्तिस्त्रिपुरवासिनी ।

श्रवाणाशिवतत्वाचकामतत्वानुरागिनी॥ प्रा
च्यवाचीप्रतीचीदिगुदीचीदिविदिदिक्षा॥
अहंकृतिरहंकारावलिमायाबलिप्रिया॥ स्वक
सृत्रवासासिधेनीचसमुद्राश्चाइदेवता॥ मातामा
तामहीतृत्रि:पितृमातापितामही॥ स्नुषादे
हित्रिणीपुत्रीपौत्रीनप्त्रीप्रिशुप्रिया॥ स्तनदास

भ॰
स॰
२८

नधाराचविषयोनिः स्तनंधयी ॥ भिक्षूत्संग
धरादोलादोलाक्रीडाभिनंदिनी ॥ उर्वशीक
टलीकेकाविशिखाशिखिवर्तिनी ॥ खट्वांगधा
रिणीखड्गबाणपुंखानुवर्तिनी ॥ लक्षप्राप्तिः
करालक्षालक्षणावशुभलक्षणा ॥ वर्तिनीरूप(
ण्याचारापरिखाचखेनिर्वृतिः ॥ प्राकारवलयावे

लामर्यादा च महोदधौ ॥ पद्मिणी शोभणी शक्ति
दीर्घकेशी सुलोचना ॥ ललिता मोमन्त्रातन्वी ।
वेदवेदांगधारिणी ॥ नराहस्त्यानमत्ता च नर
मुंडास्थिभूषणा ॥ अनन्तक्रीडारतिः शारीशारि
काश्रुकभाषिणी ॥ भ्रांमरी गारुडी विद्या वारु
णी वरुणार्चिता ॥ वाराही मुंडहस्ता च दंष्ट्रोद्धृ ।

भ॰
स॰
२९

नवक्षेटरी ॥ मीनमूर्त्तिर्धरामूर्त्तो वदन्या प्रतिमा ॥
श्रया ॥ अमूर्त्तो निधिरूपा च सालिग्रामशिलाश्रु ॥
ति: ॥ स्मृतिसंस्काररूपा च तत्संस्कारार्थसंस्कृतिः
प्राकृता देवभाषा च गाथा गीतिः प्रहेलिका ॥ उ
डा च पिंगला पिंगा सुषुम्णा सर्ववाहिनी ॥ शाकि
सवा च तालस्या काकिन्यमृतजीविनी ॥ ३७५ ॥

त्रपाव्हद्ररूपालचतुत्रपा गुहस्थिता ॥ स्थावराजंग
मा देवी कृतनकर्मफलप्रदा ॥ विषयाक्रांतदेहा
च निर्विशेषा जितेंद्रिया ॥ विश्वरूपा चिदानंदा
परंब्रह्मप्रबोधिनी ॥ निर्विकारा निर्वैरा विरतिः
सत्ववर्धिनी ॥ पुरुषाज्ञा च भिन्ना च दांतिः कैव
ल्यदायिनी ॥ विविक्तसेविनी प्रज्ञाजनयित्री बहु

भ॰
स॰
२८

श्रुतिः॥ निरीहा च समस्तैका सर्वलोकैकसेविता॥
सेवा सेवाप्रिया सेव्या सेवाफलविवर्धिनी॥ कलौ
कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी॥ प्रत्यञ्चा
च धनुर्यष्टिः खड्गधारा दुरानतिः॥ अश्वप्लुतिश्च व
ल्गा च सृणिः सन्मत्तवारणा॥ वीरभूर्वीरमाता च
वीरसूर्वीरनन्दिनी॥ जयश्रीर्जयदीक्षा च जयदा ।

जयवर्धिनी ॥ सौभाग्यसुभगाकारा सर्वसौभाग्य
वर्धिनी ॥ क्षेमंकरी सिद्धिरूपा सत्कीर्त्तिपथिदेवता
सर्वतीर्थमयी मूर्त्तिः सर्वदेवमयी प्रभा ॥ सर्वसि
द्धिप्रदा शक्तिः सर्वमंगलमंगला ॥ ॥ ॥
ॐ पुण्यं सहस्रनामेदं मेवाया शिवभाषितं ॥ यः प
ठेत्प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥ यश्चापि शृ

भ· स· २९

ध्यायन्नित्यं नरो निश्चलमानसः ॥ एककाले द्विका
ले वा त्रिकाले श्रद्धयान्वितः । सर्वदुःखविनिर्मुक्तो
लोभक्रोधविवर्जितः ॥ तेजस्वी बलवान्शूरः शो
करोगविवर्जितः ॥ यशस्वी कीर्तिमान्धन्यः सुभ
गो लोकपूजितः । रूपवान्गुणसंपन्नः प्रभावीर्य
समन्वितः । श्रियांसिलभते नित्यं निश्चलां च शुभां

श्रियं ॥ सर्वपापविनिर्मुक्तो लोभक्रोधविवर्जितः ॥
नित्यं बंधुजनादाराः पुत्रपौत्रमहोत्सवैः ॥ नंदि
तः सेवितो भृत्यैर्बंधुभिः सुविमानसैः ॥ विद्या
नां पारगो विप्रः क्षत्रियो विजयी रणे ॥ वैश्यस्तु
धनलाभाढ्यः शूद्रः सुखमवाप्नुयात् ॥ पुत्रा
र्थी लभते पुत्रान्धनार्थी विपुलं यशम् ॥ उक्ताका

भ॰ मेत्कामार्थीधर्मार्थीधर्ममाप्नुयं॥कन्यार्थीलभ
स॰ तेकन्यांरूपशीलगुणान्वितां॥देवेचबहुमस्य।
१० स्याज्ञाबन्धबहुउपद्रवा:॥नाशुभंनापदंतस्य।
नभयंनृपशत्रुत:॥जायतेनाशुभावृद्धिर्लभते।
कुलधर्यंतो॥नबाधंतेग्रहस्तस्यनक्षत्राणिनपन्न
गा:॥नपिशाचानडाकिन्योभूतवेतालजंबुका

बालग्रहाविभूतानां बालानां शान्तिकारकं ॥ देवा
नां प्रीतिमेदं चमेत्रीकरणमुत्तमं ॥ लोहपाशैर्द
ढैर्बद्धो वेदीवेश्मविदुर्गमे ॥ तिष्ठन्स्मृणान्मठ(
न्मेर्णे मुच्यते नात्र संशयः ॥ न दाराणां न पुत्राणां
न बंधूनां न मित्रजन्म ॥ मपंपत्ति न हि तेशोकं विये
गं चिरजीविनः ॥ अथ स्खलमतेहृष्टिं चत्सरोगेने

भः॰ स॰ ३१

बाध्यते ॥ बधिरः श्रुतिमाप्नोति मूको वाचं शुभां
नरः ॥ पतद्गर्भा च या नारी स्थिरगर्भा च जायते ॥
स्राविणी बद्धगर्भा च सुखमेव प्रसूयते ॥ कोष्ठि
नः शीर्णिदेहा ये गनके शानखिन्वचः ॥ पठनाश्रव
णाद्वापि दिव्यकाया भवंति ते ॥ ये पठंति सदाम १
र्त्याः शुचिधर्मे नो जितेन्द्रियाः ॥ अपुत्राः प्राप्नुयुः पु १

त्रान्सुएवं तेपि न संशयः॥ महाव्याधिपरिग्रस्ता
स्तमायेविविधैर्ज्वरैः॥ भूताभिषंगसंजातैस्था(
त्वर्थिकत्तृतीयकैः॥ अन्यैस्सुदारुणैरोगैः पीड्य
मानास्तुमानवाः॥ गतबाधाप्रजायंतेनिसुक्ता
नात्रसंशयः॥ श्रुतग्रंथपरोबालोदिव्यवादीक
वीश्वरः॥ पठनात्कुवर्णाह्नापिभवत्येवनसंशयः

भ॰ स॰ ३२

ग्रहण्यां वा चतुर्दश्यां नवम्यां चैकचेतसः ॥ ये पठं
ति सदा मर्त्या न ते वै दुःखभाजनाः ॥ नवरात्रे यता
हारो दृढभक्ति जितेंद्रियः ॥ चंडिकायतने विद्वा
श्रुचिष्मान्मूर्त्तिसन्निधौ ॥ एकाकी तु शतावर्त्तं प
ठन्धीरश्च निर्भयः ॥ साक्षाद्भगवती तस्मै प्रयच्छे
दीप्सितं फलं ॥ सिद्धपीठे गिरौ रम्ये सिद्धदेवे ह्मा

लये॥ पठनात्साधकस्याशु सिद्धिर्भवति वांछि
ता॥ दृष्णा वर्णैः पठेच्यस्तु भूमिप्रायो नरः शुचि॥
स्वप्ने मूर्त्तिमन्तो देवी वरदा सोपि पशुपति॥ आवर्त्ते
न सहस्रेण पठंति ब्राह्मणोत्तमाः॥ ते सिद्धाः सिद्धि
दा लोके सामानुग्रहणे त्तमाः॥ कविले संस्कृते
तेषां समाहारणं व्याहृतौ स्वतः॥ शाक्तिः श्रोन्मील(

भ.
स.
३२

नेम्यांते न धीतेष्ठापि भावंतौ ॥ नावरागाशिरोरत्न
द्विगुणीकृतरोचिषः ॥ प्रयच्छंतश्च सर्व्वस्वं मेवंते
तान्महेश्वरः ॥ रोचनालिखितं भूर्जे कुंकुमेन शुभे
दिने ॥ धारयिच्चेत्रितं देहे पूजयित्वा कुमारिकाः ॥
विप्रांश्च वरनारीश्च धूपैः कुसुमचंदनैः ॥ नीव
विडाज्यभोज्यैश्च भोजयित्वा सुहृत्पिता ॥ बध्नंति

ये महारत्नां बालानां च विशेषतः ॥ भवंति नृपशू
न्यास्ते कीर्त्तिभाजो यशस्विनः ॥ शत्रुते न भयं तेषां
दुर्जनेभ्यो न राजतः ॥ न च दाराभिचारेभ्यो न दारि
द्र्यान्न दुर्गते ॥ महार्णवे महानद्यां पोतस्थेपि न भी
कचित् ॥ रणे च्कते विवादे च विजयं प्राप्नुवंति ते ॥
न पाप्भव प्रयतो यांति न पमायास्त्रयेन राः ॥ सर्व

भ॰
म॰
३४

त्रय जिता लोके वड्डमान पुरःसराः । रतिरागविव
द्धाश्च विह्वला काममोहिताः ॥ यौवनाक्रान्तदेहा
स्ताश्च यं ने वामलोचना ॥ लिखितेसुभित्तिकेषैवा
धारयेद्यो रणे स्तुचिः ॥ समधातुग्रस्यमाने तेपश्च
निपरिपंथिनः ॥ केनोवाउड्डभौ येषानिश्छेदे लि
खिते रणे ॥ मायासैन्यपरित्रस्तान्कोदीप्तानन्द

तैजसाः॥ विवेतनान्वितमूढंश्चेणासुकृतसविव
र्जिता॥ निर्जित्यशत्रुसंघातंल्लिलभंतेविजयंध्रुवं
नाभिचारोनपाणपक्षुद्राणांवीरादिपीडनं॥ शाकि
नीप्रतनाकन्यामहामारीचशाकिनी॥ भूतापोता
पिशाचास्थ्यरक्षांसिक्षेत्रवादयः॥ नविशंतिगृहेदे
हेलिखितंयत्रतिष्ठति॥ नपाहानलतोयोवा।(

भ·
स·
नृध

35

येतस्योपजायते ॥ दुर्हृतानां चपापानां बलहानि
करं परं ॥ मंडराकरिष्णलाहगवां गोष्ठे समाहि
तः ॥ पठेन्नरोघ प्राणां पर्व्वे कूटपाकलिनाशनम् ॥
यमदूता नृपश्यंति नतेनिरययातनाम् ॥ श्रोष्य
वंति च ये भक्तातेशिवलोकसनातने ॥ सर्व्वबाधास
वोगाह सर्व्वदुःखनिवारणम् ॥ सर्व्वमंगलकान्त्व

ंर्पपठितव्यंसमाहितैः॥श्रोतव्यंचसदाभक्त्याप
ठेस्वस्त्ययनेमहत॥११॥गुणेमहत्स्वनामेदंमेवा
याकृद्भाषितं॥चतुर्वर्गप्रदंमन्त्रंनेदिकेनप्रका
शितं॥नातःपरतरोमन्त्रोनातःपरतरःस्तवः॥
नातःपरतराविद्यातीर्थंनातःपरात्परं॥तेधन्याःकृ
तपुण्यास्तेतएवभुविपूजिताः॥एकभावेसुदाति

भ० स० ३९

त्वं येचैंतिमहेश्वरी॥ देवतानांदेवतायाब्रह्मचै
र्याचमेविना॥ भूयात्मावरदालोकेसाधूनांविष्णमे
गला॥ एतामेवपुराराध्यविद्यांत्रिपुरभैरवीं॥ त्रै
लोक्यमोहनेदेवीमाकाशीभगवान्हरिः॥ १५०॥
इतिश्रीरुद्रयामलेतंत्रेनंदिकेश्वरसंवादेभवा
नीनामसहस्रस्तवराजः समाप्तः॥ ॥

ॐज त्वं पापहरं नतं बलकरं संपूजितं श्रीकरं ॥१
ध्यातं मानं करं स्तुतं धनकरं संभाषितं सिद्धिदं ॥
गीतं संकटहारिं वांछितं प्रतत्रुतं ते पादपद्मद्वयं ॥१
भक्तानां भवभीतिभंजनकरं सिद्धिप्रदं पातु नः
निर्वाणं मायाकुंडलिनी क्रिया मधुमती कालीक(
लामालिनी ॥ मातंगी विजयाजया भगवती देवी

भः
सः
३२

37

शिवावामांभवे ॥ शक्तिःशंकरवल्लभात्रिमयिनी
वाग्वादिनीभैरवी ॥ ह्रींकारीत्रिपुरापरमयी
मौङ्कमारीनिसि ॥ आत्मनःश्रभीष्टसिद्ध्यर्थे ॥
विधिहीनंद्रव्यहीनंमंत्रहीनंचयद्गतं ॥ तत्सर्वं
क्षम्यतांदेविकृपयापरमेश्वरि ॥ शरणागतदी
नार्त्तपरित्राणपरायणे ॥ जगतःकारणेदुर्गेना

रायणिनमोस्तुते

सुंदरीभैरवीकालीताराबाग्लामिवैवमलवीय
र्चिन्त्वातुलसीपत्रैःसर्वकामःप्रसिध्यति
तुलसीविल्वपत्रैश्चधात्रीपत्रैश्चाऽर्चये

पार्वती

यंत्रराजश्चसर्वकामःप्रसिध्यन्ति

१८

ॐ ऐं श्रीं ह्रीं क्लीं नमो नमः सिंहाय सर्व कार्य प्र
धना [illegible] ॥१॥

नं० १०४४-घ

रुद्रयामले भवानीसहस्रनाम

रुद्रयामलतन्त्रे भवानीसहस्रनाम स्तवम्

पत्राणि ३८